द्योतने, २ आभिमुख्ये, ३ अभिलाषे, ४ वीप्सायाम्, ५ लक्षणे, ६ समन्तादर्थे। ७ घर्षणे दुर्गा०। "अभि पूजा-भृशार्थेच्छासौम्याभिमुख्यसौरूप्यवचनाहारस्वाध्यायेषु" गण-रत्नोक्तेः पूजादौ च तत्र पूजायाम् अभिवन्दते अभिवाद-यते। भृशार्थे अभियुक्तः अभिनिवेशः। इच्छायाम् अभि-लाषः अभिकः। सौम्यं माधुर्य्यम् तत्र अभिजातः "प्रज-ल्पितायामभिजातवाचि" कुमा०। आभिमुख्ये अभिमुखम् अभ्यग्नि शलभाः पतन्ति "अभिचैद्यं प्रतिष्ठासुः" माघः सौरूप्ये अभिरूपम्। वचने, अभिधानम् "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः" इति काव्य०प्र०। आहारे अभ्यवहारः। स्वाध्याये अभ्यस्यति "वेदाभ्यासे सदारतः" स्मृतिः। स्वाध्याय इत्युपलक्षणम् अन्यस्यापि पौनःपुन्य-मात्रेऽस्य प्रवृत्तिः 'अभ्यस्यन्ति तटाघातं निर्जितैरा-वतागजा" कु०। एतस्य च तत्तदर्थद्योतकतामात्रं समभि-व्याहृतशब्दस्यैव तत्तदर्थे लक्षणेति सिद्धान्तः अस्य क्रिया-योगे उपसर्गता "वीप्सेत्थम्भावचिह्नेषु तु कर्मप्रवचनीयता। वृक्षं वृक्षमभि सिञ्चति। हरिमभि वर्त्तते। भक्तो हरिमभि, अग्निमभि शलभाः पतन्तीत्याद्युदाहार्य्यम् शब्दपरत्वे पु० "अभिरभागे" पा०।

**अभिक** त्रि० अभिकामयते अभि+कन्। १ अनुकाभिकाभीकः कमितेति" पा०नि०। कामुके 'सोऽधिकारमभिकः कुलो-चितं काश्चन स्वयमवर्त्तयत् समाः" रघु०।

**अभिकाङ्क्षा** स्त्री अभि+काङ्क्ष—भावे अ। अभिलाषे 'प्रीताभिकाङ्क्षा सुखतिक्तता च" सुश्रु०।

**अभिकाङ्क्षित** त्रि० अभि+काङ्क्ष—कर्मणि क्त। अभि-लषिते। [स्त्रियां ङीप्।

**अभिकाङ्क्षिन्** त्रि० अभि+काङ्क्ष—णिनि। अभिलाषवति

**अभिकाम** त्रि०अभिकामयते अभि+कम—णिङ्-अच्। १काम-यमाने 'याचे त्वामभिकामाहं तस्मात् कुरु मम प्रियम्" भा०आ०प०। भावे घञ्। अभिलाषे पु० "मनसाप्यभि-कामस्य कुरुक्षेत्रं युधिष्ठिर! भा०व०प०अभिकामादागतः ठञ् आभिकामिकः अभिलाषात् प्राप्ते त्रि०स्त्रियां ङीप्। "गुणैश्चानुपमैर्युक्तः समस्तैराभिकामिकैः" भा०शा०प०।

**अभिक्रम** पु० अभि+क्रम—भावे घञ् अवृद्धिः। १ आरम्भे, २ आरोहणे, ३ युद्धाय, शत्रुसंमुखयाने च। कर्मणि घञ्। ४ आरब्धे "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते" गीता।आधारे घञ्। ५ युद्धे।

**अभिक्रत्वन्** त्रि० अभि+क्र—ङ्वनिप् स्त्रियां ङीप् वनो रश्च। आभिमुख्येन कारिणि। "अपेयं रात्र्युच्छन्त्यपोच्छन्त्वभि-क्वरीः अथ० २,८,२।

**अभिक्लृप्त** त्रि० अभि+क्लृप—क्त रोलः। १ सम्पन्ने २ नियते ३अभिप्रकाशिते च 'हृदा मनीषा मनसाभिक्लृप्ताय एतद्विदुः" कठ उप०।

**अभिक्रतु** पु० आभिमुख्येन क्रतुर्युद्धकर्म यस्य। बलवति। "अथाभवद्दमिताभिक्रतूनाम्" ऋ० ३,३४,१०। "अभि-क्रतूनाम् बलीयसाम्" भा०।

**अभिक्रान्ति** स्त्री अभि+क्रम—क्तिन्। १अभिक्रमे २उपक्रमे 'यज्ञस्याभिक्रान्तिरनपक्रमाय" श्रुतिः।

**अभिक्रान्तिन्** त्रि० अभिक्रान्तमनेन इष्टादि० इनि। उप-क्रमकर्त्तरि "य एषामध्ययने अभिक्रान्तितमः" श्रुतिः।

**अभिक्रामम्** अव्य० अभि+क्रम—वीप्साभीक्ष्ण्ययोः णमुल्। आक्रम्य, आरभ्य, आभिमुख्येन गत्वेत्यर्थे। पूर्व्वं पूर्व्व-मेवाभिक्रामम्" कात्या० ३,२,२१। [२निन्दायाम्।

**अभिक्रोश** पु० अभि+क्रुश—भावे घञ्। १आक्रोशे

**अभिक्रोशक** त्रि०अभि+क्रुश—ण्वुल्। १निन्दके२अपवादके च

**अभिक्षत्तृ** त्रि० अभि+क्षद—तृच् स्त्रियां ङीप्। हिंसके "अभिक्षत्तुरस्त्वावतो वरूताः" ऋ०७।२१।८। "अभिक्षत्तु-रभिहिंसकस्य" भा०।

**अभिक्षद** त्रि० अभि+क्षद—हिंसायाम् अच्। हिंसके। "अभिक्षदामर्य्यमाणम्" ऋ० ६,५०,१। अभिक्षदां हिंसकं छान्दसत्वात् आत्वम्।

**अभिख्या** स्त्री अभि+ख्या—अङ्। १अभिधाने, २शोभायां "काप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेशयोः" रघुः। ३ कीर्त्तौ ४ अभितः ख्यातौ, ५ माहात्म्ये "अन्वा अपश्या-न्दभन्नभिख्याम्" ऋ० १,१४८,५ "अभिख्यामभितः ख्यातिं माहात्म्यं वा" भा०। कर्त्तरि क्विप। ६अभितो गन्तरि" ७प्रसिद्धे च "अभिख्या भासा बृहता शुशुक्वनिः" ऋ०८,२३,५ "अभिख्या अभिमुखं गच्छन्त्याऽभितः प्रसि-द्धया वा भासा" भा० धातोरातोलोपात् रूपम्। ८ प्रज्ञायां निरु०।

**अभिख्यातृ** त्रि० अभि+ख्या—तृच् स्त्रियां ङीप्। १ कथके अभिगन्तरि २अभिद्रष्टरि च। "आपिरभिख्याता मर्डिता सोम्यानाम्" ऋ०४ १७,१७ "अभिख्याताभिद्रष्टा" भा०।

**अभिगत** त्रि० अभि+गम—क्त। १आनुकूल्येन प्राप्ते २सेविते ३ आभिमुख्येन गते च।

**अभिगन्तव्य** त्रि० अभि+गम—तव्य। अभिगम्ये सेव्ये च